सागरिका समिति पंजीयन क्रमांक ८७६
NEWS PAPER'S REG. NO. : 13073/67

## जयतु जयतु गौरः



सागरविश्वविद्यालयस्य संस्थापकः डॉक्टर-सर-हरीसिंहगौरः

जन्म : २६ नवम्बर १८७०  निर्वाण : २५ दिसम्बर १९४९

स हि सरहरिसिंहो दानवीरो नृसिंहो
जयतु जयतु गौरः प्राज्ञमान्योऽद्वितीयः।
इह विलसति धन्यो विश्वविद्यालयोऽयं
गुणगणमहिमानं ख्यापयन् यस्य नित्यम्॥

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)

ISSN : 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका
अङ्कः ४६/१-२, वि.सं. २०७२ (संयुक्ताङ्कः)



नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥
(शिशुपालवधमहाकाव्यम्-६.२)

ISSN : 2229-5577

राष्ट्रियसंस्कृतसंस्थानस्य वित्तसाहाय्येन प्रकाशिता

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४६/१-२, विक्रमसंवत् २०७२

षड्चत्वारिंशद्वर्षे प्रथमद्वितीयाङ्कौ
(संयुक्ताङ्कः)

**संस्थापकसंपादकः**

स्व. रामजी उपाध्यायः

**प्रधानसम्पादकः**

राधावल्लभत्रिपाठी

**सम्पादकौ**

कुसुमभूरिया दत्ता

आनन्दप्रकाशत्रिपाठी

**प्रबन्धसम्पादकः**

शशिकुमारसिंहः

**सम्पादकमण्डलम्**

नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

**सागरिकासमितिः**

संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

सन्दर्भाः

१. यजुर्वेदः
२. अथर्ववेदः
३. अथर्ववेदः-१.२९
४. अथर्ववेदः-१.२९.१
५. स्वप्नवासवदत्तम्, भरतवाक्यम्, ४.१९
६. विष्णुपुराणम्
७. शुक्ल यजुर्वेदः ३६/१७
८. अभिज्ञानशाकुन्तलम्
९. नीतिशतकम्-३७
१०. बुद्धचरितम् २.३९
११. अर्थशास्त्रम् प्रथमाधिकरणं, प्रकरणं-१५ अध्यायः -१८
१२. नीतिशतकम्-१६
१३. भारतगीतिका-१
१४. संस्कृत साहित्य में राष्ट्रिय भावना पृ. २३६
१५. केरलोदयः महाकाव्यम् डॉ. के. एन एलुत्तच्छन्
१६. ऋग्वेदः-१०/१९१/२-४
१७. अर्थशास्त्रम् अधि.-१, प्रक. ८, अध्य. १६,पृ. ५७
१८. पं. सुधाकरशुक्लकृतं देवदूतं पूर्वार्द्ध-२०
१९. श्रीमद्भगवद्गीता-२.७१
२०. बृहदारण्यकोपनिद्
२१ ऋग्वेदः- १.१५.९, १.६१.१०, १.८०
२२. ऋग्वेदः-१.६१.१०
२३. बुद्धचरितम् - २८.१०
२४. बुद्धचरितम् - २८.२०
२५. रामायणम्
२६. ऋग्वेदः - १.१९१.६
२७. महाभारत, वन पर्व, १३१.१०
२८. अथर्ववेदः, १२/१/४५
२९. विष्णुपुराणम्-२.३.२५
३०. मृच्छकटिके भरतवाक्यम्

*सहायकाचार्यः, संस्कृतविभागः*
*डॉ.हरीसिंहगौरविश्वविद्यालयः*
*सागरम् ( म.प्र. )*

❖❖❖


अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577

# गार्हस्थ्याधारं दाम्पत्यजीवनम्

**शशिकुमारसिंहः**

भारतीयसंस्कृतौ मानवजीवनस्य चत्वारः लक्ष्याः मन्यन्ते। ते सन्ति धर्म अर्थः कामः मोक्षश्च। येषु मोक्षः सर्वोत्तमलक्ष्यरुपेण स्वीक्रियते समाजे। मोक्षं सम्प्राप्य जनाः जागतिकसंसृष्टेः विमुक्ताः भवन्ति। जगति मानवाः इमान् लक्ष्यान्कथं प्राप्नयुः अस्मिन् सन्दर्भे बहवः विचाराः निर्देशाः च आप्राचीनकालादेव दीयन्ते आचार्यैः। मनीषिणः मानवानां स्वस्थसामाजिकजीवनं तथा च मोक्षप्राप्त्यर्थं प्रमुखरुपेण सिद्धान्तद्वयं प्रतिपादितमस्ति-वर्णसिद्धान्तः आश्रमसिद्धान्तश्च। वर्णसिद्धान्तेन मानवानां सामाजिक व्यवहाराः विनिर्दिश्यन्ते, आश्रमसिद्धान्तेन तेषामाध्यात्मिकोन्नयनस्य कृते दिशा-निर्देशाः दीयन्ते। आश्रमसिद्धान्ते एका विशिष्टा प्रक्रिया विद्यते। यस्यां मोक्षस्य प्राप्तेः उपायाः उपलभ्यन्ते। 'आश्रमः' शब्दोऽयं 'श्रम' शब्देन निर्मितो भवति। अस्य व्युत्पत्तिः भवति 'आश्रमयन्ति अस्मिन्' इति आश्रमः। यस्मिन् जनाः पर्याप्तं परिश्रमं कुर्वन्ति स एव आश्रमः। यद्यपि 'आश्रम'-शब्दस्य उल्लेखः वैदिकसंहितासु च ब्राह्मणग्रन्थेषु तु न प्राप्यते परन्तु उपनिषत्सु, धर्मसूत्रेषु, स्मृत्यादिषु च 'आश्रम' शब्दस्य उल्लेखः तथा च तद्विषये सुविस्तीर्णा चर्चाऽपि प्राप्येते। आश्रमस्य चतुर्भेदाः मन्यन्ते। ब्रह्मचर्यः, गार्हस्थ्यः, वानप्रस्थः, सन्यासश्च।

आपस्तम्ब धर्मसूत्रे उल्लिखितमस्ति-

अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577

कालेनावरणात्ययात्परिणते यत् प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते।[१३]

अर्थात् दाम्पत्यजीवनं सुखदुःखयोः द्वयोः स्थित्योः समानमेव भवति। इदं दाम्पत्यं सर्वासु अवस्थासु गृहस्थे आनन्दमुत्पादयति। यौवने तु आनन्दकरं भवत्येव वृद्धावस्थायामपि तयोः पति-पत्न्योः अनुरागः न्यूनः न भवति। मृत्युपर्यन्तं कल्याणकरमेव भवति दाम्पत्य-जीवनम्।

दाम्पत्यस्य संरक्षणाय तस्य समृद्धये आवश्यकीऽस्ति यत् अस्य दाम्पत्यस्य घटकद्वय-पतिपत्न्योः मध्ये सामंजस्य सुष्ठुः समीचीना, सुदृढा स्थितिः।

पत्युः पतयः उपरि तथा च पत्न्यः पत्युः उपरि अखण्डविश्वासः सम्पूर्णसमर्पणश्च। एकस्य अपरस्य कृते पर्याप्तं महत्त्वं, प्रभूतमात्रायां सम्मानं च। दाम्पत्ये पत्न्यः महत्त्वं प्रदर्शनाय एव महाकविना कालिदासेन रघुवंशे उच्यते यत् पत्नी एव पत्युः सिद्धं मित्रं भवति सा एव पत्युः मन्त्री जीवनसंगिनी च वर्तते।

''गृहिणीसचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।।''[१४]

महाभारते उल्लिखितमस्ति यत् पत्नीं विना गृहं वन समानं भवति

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं तु गृहिणीहीनमरण्यसदृशं मतम्।।[१५]

पत्न्यः पत्युः कृतेऽपि नैके व्यवहाराः शास्त्रैः निर्दिश्यन्ते। मनुना मनुस्मृतौ कथ्यते यत् एतत् अत्यावश्यकमस्ति यत् पत्नी पत्युः आज्ञां सश्रद्धया-नुसरेत्। तस्य कृते अधिकं सम्मानं प्रदाय विहँस्यैव गृहस्य सर्वकार्यं सम्पादयेत्।

सदाप्रहृष्टया भाव्यं गृहकार्येषु दक्षया।
सुसंस्कृतोपस्कारया: व्यये चामुक्तहस्तया।।[१६]

परन्तु वर्तमानसमाजे स्थितिः एतादृशी नास्ति। कालेस्मिन् शास्त्रोचितानां गुणधर्मानां अभावं दृश्यते सर्वत्र। आधुनिके दाम्पत्य जीवने भौतिकतावादस्य साम्राज्यः विलसते समाजे। अत्र चाकचिक्यपूर्णानां मनोहारिविकल्पानां अतिशयता भृशं उपलभ्यते। एतेषु विकल्पेषु एव जनाः भ्रमिताः भवन्ति। मानवानां पार्श्वे मानवानां कृते अवकाशो एव नास्ति। पति-पत्न्यौऽपि स्वकीयेषु पृथक्-पृथक् विषयेषु निमग्नौ स्तः। एतादृशी विचित्रास्थितिः दम्पत्तिनां चित्तेषु अनेकाः विकृतीन् उत्पादयति। अस्य परिणामः भवति विवाह-विच्छेदः। वर्तमानसमये दम्पत्तौ परस्परं प्रेम-समर्पण-आस्था-त्यागादिनां भावानां अभावः दृश्यते। पाश्चात्य जीवनशैल्यः अन्धानुकरणात् पति-पत्न्योः मूल्येषु ह्रासः भवति क्रमशः। नास्ति स्थितिः एषा सुखकरी, सन्तोषकरी च। आवश्यकताऽपि



दाम्पत्यजीवनस्य संरक्षणस्य, तस्मिन् दृढतायाः आधानस्य। तदैव मानवजीवने सुख-शान्तयोः आगमनं भवितुं शक्यते, तदैव च गृहस्थाश्रमस्य कर्त्तव्यानां सम्यक् निर्वहणं अपि भविष्यति।

**सन्दर्भाः**

१. आपस्तम्बधर्मसूत्रम् - २.९.२१.१
२. गौतमधर्मसूत्रम् ३.२
३. मनुस्मृतिः - ६/८७
४. धर्मशास्त्र का इतिहास, पी.वी. काणे
५. मनुस्मृतिः - ६/८७
६. आपस्तम्बधर्मसूत्रम् २.९.२१/७-८
७. वशिष्ठधर्मसूत्रम् ८/१४-१८, दक्ष.-२/५७-६०
   विष्णुधर्मसूत्रम् ५९/२९
८. गौतमधर्मसूत्रम् ३/३५
९. मनुस्मृतिः - ६/८९
१०. मनुस्मृतिः - ६/९०
११. मनुस्मृतिः - ९/१०१
१२. याज्ञवल्क्यस्मृतिः १/७४
१३. उत्तररामचरितम् १/३९
१४. रघुवंशम् ८/६७
१५. महाभारतम् १३/१४५/०६
१६. मनुस्मृतिः - ६/१५०

*सहायकाचार्यः*
*संस्कृतविभागः*
*डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)*

❁❁❁